तस्य निदानं यथाह माधवकरः ।
"क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः ।
पित्तञ्च केशान् पचति पलितं तेन जायते ॥"
तच्चिकित्सा यथा,—
"लौहचूर्णस्य कर्षन्तु दशार्द्धघृतमञ्जनः ।
धात्रीफलद्वयं पथ्ये द्वे तथैकं विभीतकम् ॥
पिष्ट्वा लोहमये भाण्डे स्थापयेन्निशि वासयेत् ।
लेपोऽयमचिराद्धन्ति पलितं नेह संशयः ॥
दशार्द्धं पञ्चकर्षाणि ।
काश्मर्य्या मूलमादौ सहचरकुसुमं केतकस्यापि मूलं
लौहं चूर्णं सभृङ्गं त्रिफलपलयुतं तैलमेभिः पचेत्तु ।
कृत्वा लोहस्य भाण्डे क्षितितलनिहितं स्थापयेन्मासमेकं
केशाः काशप्रकाशा अपि मधुपनिभा अस्य योगाद्भवन्ति ॥
त्रिफला नीलिकापत्रं भृङ्गराजोऽयसो रजः ।
अवीमूत्रेण संपिष्टं लेपात् कृष्णीकरं परम् ॥"
इति भावप्रकाशे मध्यखण्डे क्षुद्ररोगाधिकारे ॥
शैलजम् । तापः । कर्द्दमः । इति मेदिनी । ते, १२२ ॥ (पल गतौ+"लोष्टपलितौ ।" उणां । ३ । ९२ । इति क्तप्रत्ययेन निपातनात् सिद्धम् ।) केशपाशः । इति हेमचन्द्र, उज्ज्वलदत्तश्च ॥

पलितः, पुं, (फलति वृद्धावस्थायां केशशौक्ल्यादिकं प्राप्नोतीति । फल+"फलेरितजादेश्च पः ।" उणां । ५ । ३४ । इति इतच् फस्य च पः ।) वृद्धः । इति जटाधरः ॥

पलिता, स्त्री, (पलित+टाप् ।) वृद्धा । इति जटाधरः ॥

पल्यङ्कः, पुं, (परितोऽङ्क्यतेऽत्र इति । परि+अकि लक्षणे+घञ् । "परेश्च घाङ्कयोः ।" ८ । २ । २२ । इति रस्य लः ।) पर्य्यङ्कः । इत्यमरः । २ । ७ । १३८ ॥ (यथा, रामायणे । २ । ३२ । ६ ।
"पल्यङ्कमग्र्यास्तरणं नानारत्नविभूषितम् ।
तमपीच्छति वैदेही प्रतिष्ठापयितुं त्वयि ॥")

पल्ययनं, क्ली, (परितः अयति गच्छति अनेन । परि+अय गतौ+करणे ल्युट् । रस्य लत्वम् ।) पर्य्याणम् । इति हेमचन्द्रः । ४ । ३१८ ॥ घोड़ार जिन् इति भाषा ॥

पल्युल, त् क लूनिपूत्योः । इति कविकल्पद्रुमः । (अदन्तचुरां-परं-सकं-सेट् ।) यकारयुक्तैकलकारमध्यः ह्रस्वमध्यश्च । लूनिश्छेदः । पूतिः पवित्रीकरणम् । अपपल्युलत् तृणं लोकः । पल्युलयति जनं गङ्गा । इति दुर्गादासः ॥

पल्यूल, त् क लूनिपूत्योः । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) यकारयुक्तैकलकारमध्यः दीर्घमध्यश्च । लूनिश्छेदः । पूतिः पवित्रीकरणम् । अपपल्यूलत् तृणं लोकः । पल्यूलयति जनं गङ्गा । इति दुर्गादासः ॥

पल्ल, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पल्लति । इति दुर्गादासः ॥

पल्लः, पुं, (पल्लति शस्यादिप्राचुर्य्यं गच्छतीति । पल्ल+पचाद्यच् ।) स्थूलकुशूलकम् । इति मेदिनी । ले, ३० ॥ पालुइ इति मराह इति च भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने १३ अध्याये ।
"सुपिधानन्तु तं कृत्वा यवपल्ले निधापयेत् ॥")

पल्लवः, पुं, क्ली, (पल्यते इति पल् । पल+क्विप् । लूयते इति लवः । लू+"ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । ततः पल् चासौ लवश्चेति ।) नवपत्रादियुक्तशाखाग्रपर्व्व । इति भरतः ॥ नवपत्रस्तवकः । "इति मधुः ॥ पर्व्वपत्रादिसंघाते शाखायाः पल्लवो मतः ।" इति कोषान्तरम् ॥ (यथा, रघुः । ९ । ३३ ।
"अभिनयान् परिचेतुमिवोद्यता
मलयमारुतकम्पितपल्लवा ।
अमदयत् सहकारलता मनः
सकलिकाकलिकामजितामपि ॥")
तत्पर्य्यायः । किसलयम् २ । इत्यमरः । २ । ४ । १४ ॥ प्रवालम् ३ नवपत्रम् ४ । इति राजनिर्घण्टः ॥ वलम् ५ किसलम् ६ किशलम् ७ किशलयम् ८ विटपः ९ । इति शब्दरत्नावली ॥ पत्रयौवनम् १० । इति जटाधरः ॥ विस्तरः । बलम् । शृङ्गारः । अलक्तरागः । इति विश्वमेदिन्यौ ॥ वलमित्यत्र वनमिति क्वचित् पाठः ॥ वलयः । चापलः । इति शब्दरत्नावली ॥ (देशविशेषः । तद्देशवासिषु पुं भूम्नि । यथा, मार्कण्डेये । ५७ । ३६ ।
"अपरान्ताश्च शूद्राश्च पल्लवाश्चर्म्मखण्डिकाः ।
गान्धारा गवलाश्चैव सिन्धुसौवीरमद्रकाः ॥")

पल्लवकः, पुं, (पल्लवेन शृङ्गारेण कायतीति । पल्लव+कै+कः ।) वेश्यापतिः । (पल्लव इव कायतीति ।) मत्स्यविशेषः । इति हलायुधः ॥ (पल्लवः किसलयैः कायतीति । अशोकवृक्षः । इति कश्चित् ॥)

पल्लवद्रुः, पुं, (पल्लवप्रधानो द्रुर्वृक्षः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

पल्लवाधारः, पुं, (पल्लवस्य आधारः ।) शाखा । इति शब्दचन्द्रिका ॥

पल्लविकः, त्रि, (पल्लवः शृङ्गाररसोऽस्त्यस्मिन् वा । पल्लव+ठन् ।) कामुकः । इति हेमचन्द्रः । २ । २४५ ॥

पल्लवितं, क्ली, (पल्लवोऽलक्तरागः सञ्जातोऽस्य । तारकादिभ्य इतच् ।) लाक्षारक्तः । इति मेदिनी । ते, २०४ ॥

पल्लवितः, त्रि, (पल्लवः सञ्जातोऽस्य । पल्लव+इतच् ।) सपल्लवः । पल्लवयुक्तः । ततम् । विस्तृतम् । इति मेदिनी । ते, २०४ ॥

पल्लवी, [न्] पुं, (पल्लवाः सन्त्यस्य । पल्लव+इनिः ।) वृक्षः । इति शब्दमाला ॥ (पल्लवविशिष्टे, त्रि । यथा, कुमारे । ३ । ५४ ।
"पर्य्याप्तपुष्पस्तवकावनम्रा
सञ्चारिणी पल्लविनी लतेव ॥")

पल्लिः, स्त्री, (पल्लतीति । पल्ल+"सर्व्वधातुभ्य इन् ।" इति इन् ।) ग्रामकः । कुटी । इति हेमचन्द्रः ॥ कुटीसमुदायः । ग्रामः । इत्यन्ये । गृहमिति भट्टः ॥ कुटीग्रामकयोः पल्लीति शाश्वतः ॥ स्थानमिति स्वामी ॥ पतन्ति भरणेन भ्रमणेन च जीवन्तीति क्विपि पतो गावः ते लीयन्तेऽत्र पल्लिः नाम्नीति डिः पान्थोणादीनि ङीपि पल्ली च गोपपल्लीप्रभृति च । इत्याभीरपल्लिशब्दटीकायां भरतः ॥ (गृहगोधिका । इति हेमचन्द्रे पल्लीशब्ददर्शनात् ॥)

पल्लिका, स्त्री, (पल्लि+स्वार्थे कन् ततष्टाप् ।) गृहगोधिका । इति राजनिर्घण्टः ॥

पल्लिवाहः, पुं, (पल्लिं कुटीं वाहयति निर्वाहयतीति । पल्लि+वह+णिच्+अण् ।) तृणभेदः । यथाह राजनिर्घण्टः ।
"पल्लिवाहो दीर्घतृणः सुपत्रस्ताम्रवर्णकः ।
अदृढ़ः शाकपत्रादिः पशूनामबलप्रदः ॥"

पल्ली, स्त्री, (पल्लि+"कृदिकारादिति ।" वा ङीष् ।) स्वल्पग्रामः । (यथा, कथासरित्सागरे । १० । १३५ ।
"इतस्त्वं गच्छ मत्पल्लीं जाने सा तत्र ते गता ।
अहं तत्रैव चेष्यामि दास्याम्यस्मिमिमाञ्च ते ॥")
कुटी । इति विश्वमेदिन्यौ ॥ नगरभेदः । स तु दक्षिणदेशे प्रसिद्धः त्रिचनापल्ल्यादिः । इति शब्दरत्नावली ॥ क्षुद्रजन्तुविशेषः । टिक्टिकी इति भाषा । तत्पर्य्यायः । मुसली २ गृहगोधा ३ विश्वम्भरा ४ ज्येष्ठा ५ कुड्यमत्स्यः ६ पल्लिका ७ गृहगोधिका ८ । इति राजनिर्घण्टः ॥ गृहगोलिका ९ माणिक्या १० भित्तिका ११ गृहोलिका १२ । इति हेमचन्द्रः । ४ । ३६३ ॥ अवशिष्टं ज्येष्ठीशब्दे द्रष्टव्यम् ॥ (अस्याः पतनफलमुक्तं यथा, ज्योतिषशास्त्रे ।
"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणहृदिस्था सर्व्वसौख्यं ददाति ॥")

पल्वलं, क्ली, पुं, (पलति गच्छति पिबत्यस्मिन् वा । पल गतौ पा पाने वा+"सानसिवर्णसिपर्ण-सीति ।" उणां । ४ । १०७ । इति निपातनात् वलच् प्रत्ययेन सिद्धम् ।) अल्पसरः । इत्यमरः । १ । १० । २८ ॥ (यथा, महाभारते । ७ । ५१ । ६ ।
"पल्वलानि च सर्व्वाणि सर्व्वे चैव तृणोपलाः ।
स्थावरं जङ्गमञ्चैव निःशेषं कुरुते जगत् ॥")
तस्य लक्षणं यथा,—
"अल्पं सरः पल्वलं स्यादयत्र चन्द्रार्कगे रवौ ।
न तिष्ठति जलं किञ्चित्तत्त्वं वारि पाल्वलम् ॥
तज्जलगुणाः ।
पाल्वलं वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत् ॥"
इति भावप्रकाशः ॥
"पाल्वलं गुर्व्वभिष्यन्दि विष्टम्भि दोषलं परम् ॥"
इति राजवल्लभः ॥